श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनारायणाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनारायणाष्टकम् ॥

आर्तानां दुःखशमने दीक्षितं प्रभुमव्ययम्।
अशेषजगदाधारं लक्ष्मीनारायणं भजे॥ 1 ॥

अपारकरुणाम्भोधिं आपद्बान्धवमच्युतम्।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे॥ 2 ॥

भक्तानां वत्सलं भक्तिगम्यं सर्वगुणाकरम्।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे॥ 3 ॥

सुहृदं सर्वभूतानां सर्वलक्षणसम्युतम्।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे॥ 4 ॥

चिदचित्सर्वजन्तूनां आधारं वरदं परम्।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे॥ 5 ॥

शङ्खचक्रधरं देवं लोकनाथं दयानिधिम्।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे॥ 6 ॥

पीताम्बरधरं विष्णुं विलसत्सूत्रशोभितम्।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे॥ 7 ॥

हस्तेन दक्षिणेन यजं अभयप्रदमक्षरम्।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे॥ 8 ॥

यः पठेत् प्रातरुत्थाय लक्ष्मीनारायणाष्टकम्।
विमुक्तस्सर्वपापेभ्यः विष्णुलोकं स गच्छति॥ 9॥

॥ इति श्री लक्ष्मीनारायणाष्टकं समाप्तम्॥